सेनां गुहूसंवरणे इगुपधेतिकः गुहःषाण्मातुरेपुंसि सिंहपुच्छ्यांचगर्तेचपर्वतादेश्चशंकरे ३९ बहुलानांकृत्तिकानामपत्यं स्त्रीभ्योढक् तारकंजयति विशाखेति शाखेद्वयाश्लेषार्पणे पचाद्यच् विशाखायांजातइतिवा
संधिवेलाद्यृतुनक्षत्रेभ्यःण् अविष्ठाफल्गुनीत्यादिनालुक् किलुकनद्धितलुकि शिखीमयूरोवाहनमस्य षण्णांमातॄणामपत्यं मातुरुत्संख्यासं· शक्तेर्धरः कुमारयति क्रीडति कुमारक्रीडायां पचाद्यच् कुत्सितोमारोस्येतिवा कुपा
पेयदर्पयोः कौमारयति इत्यन् पचाद्यच् यत्तुब्रह्मचारित्वात्कुमारइतिस्वामिनोक्तं तत्र शतक्रतोरूपवतीदेवसेनेतिप्रसिद्धा सामहेन्द्रेणास्यभार्यात्वेनोपपादिता उदीर्णसेनापतयेमहासेनायस्कन्दायेतिवायुपुराणात्
क्रौञ्चं·क्विप् अन्नाद्यण् क्रौञ्चस्यपर्वतस्यदारणः हृविदारणे णिचन्ताल्ल्युः कैलासेधनदावासेक्रौञ्चःक्रौञ्चोमिथीयतइतिहेरम्बावली अतःक्रौञ्चदारणोपि सप्तदशकार्त्तिकेयस्य ४० इन्द्रोमरुत्वान्मघवाबिडौजाःपाकशासनः वृद्ध
श्रवाःसुनासीरःपुरुहूतःपुरंदरः ४१ जिष्णुर्लेखर्षभःशक्रःशतमन्युर्दिवस्पतिः सुत्रामागोत्रभिद्वज्रीवासवोवृत्रहावृषा ४२ इन्दतिइदिपरमैश्वर्ये ऋज्रेन्द्रेत्यादिनारन् रगिणितिपुरुकारः तत्र शंतोदात्तत्वापत्तेः इन्द्रःशक्रादित्यभे
दयोगभेदान्तरात्मसु इन्द्रःकुटजेवृक्षेस्त्रीस्यात् मरुतःसन्त्यस्य मतुप् झयइतिवत्वं तसौमत्वर्थइतिभत्वाज्जश्त्वाभावः महयतेपूज्यते महपूजायाम् श्वन्नुक्षन्पूषन्प्लीहन्नित्यादिनामघवन्निनिपातितम् मघवाबहुलमितिऋत्वादेशपक्षेतृमत्
वृत्तानिमपिबोध्यम् यत्तुऋत्वादेशोदीर्घाभावाश्चमघवन्निनिस्वामिनोक्तं तत्र सर्वनामस्थानेचासंबुद्धाविति दीर्घसंभवात् नचसंयोगान्तलोपस्यासिद्धत्वम् मघवाबहुलमितिबहुलग्रहणेनतद्बाधनात् अतएवमत्पात्रन्नादिशब्द
व्याख्यानपरंवार्त्तिकंतच्छब्दं संगच्छते ह्रविर्जतित्रितिनिशंकोमतेपुमघवानसाविति भट्टिः एतेनमघवामघवानमघवर्यमितितिञ्चेस्यंवदन्मुकुटोपिपरास्तः भाष्यवार्त्तिकैकमत्यानुरोधेनऋकारमतेपिमघवानिनसैवाभ्युपगमात्
मतभेदेदृढिप्रमाणव्याख्यानासंभवात् भवतुनामतभेदस्तथापि हेतुः स्त्रीकारइत्यस्यइत्थंचरीत्यापचणादेशःप्राप्तोवार्त्तिकसिद्धाद्वीर्घतणवाधतेयथा एवंसत्रीत्यामघवन्नितिप्रयोगःशब्दोभाष्यवार्त्तिककृतप्रत्याख्यानसीत्याम घवानिप्रयोगे
णवाध्यते विडति विडभेदने इगुपधेतिकः विडंभेदकमोजोस्य सान्तः विट्स्वप्रजासुमनुष्येषुवाओजोस्येतिविडोजाइतिकेचित् पाकस्यदैत्यभेदस्यशासनः शासयति शासुअनुशिष्टौ ल्युजन्तः नन्द्यादिल्युः वृद्धंश्रुणोतिश्रु
श्रवतीश्रुस्रव् हृष्टेभ्रवसीअस्येतिवा वृद्धेषुपंडितेषुश्रवोयस्येतिवा णसहशब्दे बाहुलकादीरन् सहनासीरंसेनामुखंनासीराश्रयेस्याययस्यवा हितंन्यः अइत्यस्यप्रजार्थकत्वान्नान्यादिरपि अनापशीरंमौनशिवशेत्वा
इतिनाल्याद्रुष्टविवेकः सुनोवायुःशीरःसूर्यस्तावस्येतितिवासुरम्रयप्रिन्याद्यचिअन्येषामपीतिदीर्घइतिअन्यस्यादित्वालव्योपि पुरुप्रचुरंहूतमाह्वानंयज्ञेष्वस्य पुरःपुरीहूताणिकानिमास्य पुरोरीणांदारयति पूःसर्वयोर्दारिस
होरितिखच् वाचंयमपुरन्दरौचनिपातितः ४१ जयतिजिजये अभिभवेवा ग्लाजिस्थश्चेतिग्स्नुः जिष्णुर्नाबासवेऽर्जुने जितवेषाद्यवत् लेखेषु ऋषभः सप्तमीतियोगविभागात्समासः लेखऋषभइदेवतिवा उपमितव्याघ्रेतिस
मासः शक्नोति शक्लृशक्तौ स्फायितंचीत्यादिनारक् शक्रःपुमान्देवराजेकुटजार्जुनभूरुहोः शतंमन्यवोयागाअस्य शतेदैत्येषुक्रोधोस्येतिवा शतंमन्यवोदैन्यान्यस्य दैत्यैःपराजितत्वात् दिवःपतिः तत्पुरुषेकृतीत्यत्रबहुल
ग्रहणाद्दलुक् पुलुकिनिषुकः तत्र पातेर्डतिरित्युणादिसूत्रस्यसम्भवात् वस्तुतस्तुषष्ठ्याःपतिपुत्रेतिसत्वविधानसामर्थ्याल्लोकवेदसाधारण्येनदृक्कुमारीवरन्यायेनालुगापितः ककस्मादिभ्यःयत्रषष्ठ्याःपतिपु
त्रेतिसत्वमितिमुकुटेनोक्तं तत्र तत्रच्छन्दोधिकारात् सुष्ठुत्रायते त्रैङ्पालने आतोमनिन् सउदिश्चपसर्गस्थप्रयोगेन सुत्रामादीर्घाविति एतेनान्येषामपीतिदीर्घत्वेसुत्रामेतिवदन्मुकुटःप्रत्युक्तः गोत्रान्गिरीन्भिनत्ति स ५

स्तद्विषे तिमिदेः क्विप् वज्रोऽस्यास्ति अतइनिः वसवो देवाः वसूनि रत्नान्यस्य सन्ति ज्योत्स्नादित्वादण् वसोरपत्यमिति वा दैत्यानां च संवालिता वा गतिगन्धनयोः कः वृत्रं हतवान् ब्रह्मभ्रूणवृत्रेषु क्विप् वर्षति वृषु सेचने कनिन् वृषी-
तिकनिन् वृषा तु वासवे वृषभे तुरगे पुंसि ४२ वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः ४३ संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः आखण्डलः सहस्राक्ष ऋभुक्षास्तस्य तु प्रि-
या ४४ पुलोमजा शचीन्द्राणी नगरी त्वमरावती हय उच्चैःश्रवाः सूतो मातलिर्नन्दनं वनम् ४५ वास्तोर्गृहक्षेत्रस्य पतिरित्यधिष्ठाता वास्तोष्पतिर्गृहमेधाच्छेति निपातनादलुक् षत्वं चेत्येके इणः परत्वात्कस्कादिषु चेति षत्वं यत्तु
ऊरः पञ्चम्याः पति पुत्रेति सत्वे इणः परत्वात्संज्ञायामिति तन्न तत्र छन्दोऽधिकारात् अपदान्तस्येत्यधिकाराच्च सुराणां पतिः बलस्यासुरस्यारातिः शच्याः पतिः जम्भमसुरं भिनत्ति शीलमस्य सुप्यजातौ णिनिस्ताच्छील्ये हरिर्हयो यस्य त्वक्तो
श्वालरोमाणि सुवर्णाभानि यस्येत्त हरिः सवर्णोऽश्वस्तदीनकौशेयसप्रभ इति शाश्वतः स्वः स्वर्गे राजते सत्सुधने स्वेन धनेन राजते वा सत्स्विति क्विप् सोऽतीति लोपे हलोपश्च दिदीर्घः ज्ञात्रः नमुचिं नि सूद-
यते इगुपधात् किरितीक् नभ्राण्नपादिति निपातनात् नमुचेर्दैत्यस्य सूदनः सूदहन्तो ४३ संक्रन्दयति कृदिकारादिक्तिनः ग्राकान्ते हेतेच ल्युः दुःखेन च्यवते दुश्च्यवनः दुःसहस्थावनोऽस्य निरस्येति वा तुरतो निवरः
तुरं त्वरतो इगुपधेति कः तुरं वेगवन्तं साहयत्यभिभवति सहेः प्रसहनेऽन्तिकस्वे प्रसहनमभिभवस्तितृन्नेः ण्यन्तात्सहेः क्विप् सहेः साडः सः इति षत्वम् अन्येषामपीति पूर्वपदस्य दीर्घः आह अन्येषामपीति वा नहिवृतिवृषीति वा
दीर्घः एकदेशविकृतस्यानन्यत्वात् दीर्घविधाविति क्विलुगिति वास्याति तत्र नुषेधात् क्विप्यपरत्वानपायात् यत्तु तुरं सहत इति विगृह्य छन्दसि सह इति ण्विरिति स्वामी तन्न छान्दसस्य लोके प्रयोगायोगात् यदपि नहिवृ-
तिवृषीति पूर्वपदस्य दीर्घः इत्युक्तं तदपि न क्विबन्तेष्वेव ग्रहणाद्विश्वस्य वसुराटोरित्यत्र ण्विन्नेऽस्योपन्यासात् स्वान्नायत्वात् एतेन तुरं वेगवन्तं सहत इति वा तुरस्त्वरितः सत्वरबलानि सह इति ण्विरित्यपास्त्वमुक्तोऽपि स्वमुक्तः मेघा वाहनम-
स्य मेतान्वाहयतीति वा ल्युः आखण्डयति खडि भेदने हषादिभ्यः कलच् सहस्रमक्षीण्यस्य बहुव्रीहौ सक्थ्यक्ष्णोरिति षच् ऋभवः स्तियन्त्यत्र क्षितिनिवासगत्योः डः ऋभुक्षाः स्वर्गवज्रयोरिति विश्वः सोऽस्यास्तीति ऋभुक्षाः इति प्र-
थिवत् यद्वा ऋक्षति इयर्तीति वा मूर्धन्यो भूदिनकस्य प्रत्ययः पञ्चविंशतिरिन्द्रस्य ।४४। पुलोम्नो मुनेर्जाता पञ्चम्यामजातावितिडः अन्तर्वर्तीलोमापि तस्यापत्यमित्यण् गोत्रत्वेन जातित्वान्ङीष् शचति पाचव्यक्तायां वाचि इन् कृदिका-
रादिति ङीष् स्यादिन्द्राणी शतावरी वाकृषा रामहेन्द्राणी शक्राणी जयवादिनीति रभसः शक्रमणा निर्जाग्रत निर्जीवयति वा शक्राणी सर्वेन्द्रियेषु सचते षचसमवाये इन् सचीदन्त्यादिरपि इन्द्रस्य स्त्री इन्द्रवरुणेति ङीषा-
नुकौ यच्चान्तकिकर्ममेदीत्याकारमात्रकं शासितन्यामयति यतो विहितस्ततो स्मत्रापि भवति तेन कीर्णाली गिर्याणीत्यादि सिद्धं भवतीति धातुपारायणेऽप्यन्तपवशक्राणीति मृक्तरक्ष्य तत्र अनुकिकतेत्यतोगुणइतिपारस्य प्र-
संगात् नत्वकारोच्चारणसामर्थ्याद्दीर्घो भविष्यति अन्यथापि दिनुकमेव कुर्यादिति चेन्न अल्लोपोऽन इत्यस्य बाधेन चरितार्थत्वात् पञ्चनेति वृद्धादेशे कर्मण्ये आगममलिकङ्ककारोच्चारणसामर्थ्यादेवाल्लोपो न भविष्यतीति चेन्न
शर्वमाहेककारस्य चारितार्थ्यात् नहि तत्राल्लोपोऽस्ति संयोगादिति निषेधात् तस्मात्ककाराकारयोः सामर्थ्यविरहे परत्वपवाधनार्थदीर्घोच्चारणमावश्यकम् प्रयोगनिर्वाहकल्पमेव नीलीदुपल्मात् । अमराः सं-
त्यस्यां मतुप् मनो बहुत्वो नजरादीनामिति दीर्घः उच्चैः श्रवसी यस्य उच्चैः शृणोतीति वा असुन् उच्चैर्महत्त्वम् वायस्येति वा एकम्। मतलाति अन्तोऽनुपेति कः मतलस्यापत्यं अत इञ् एकं। नन्दयति टुनदि समृद्धौ ल्युः
अन्यनन्दनम् इन्द्रोद्यानेऽनन्दनस्तु नन्द्येऽर्षकारिणि त्रिष्विति हेमः ४५ स्याद्धासादो वैजयन्तो जयन्तः पाकशासनिः ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः ४६ वैजयन्तः पताकाः सन्त्यस्य अर्शआद्यच् वैजयन्तो
महेन्द्रस्य ध्वजप्रासादयोः पुमान् वैजयन्ती पताका या जयन्ती पादपे स्त्रियाम् इन्द्रपुत्रे च केचन। जयति जि अश्वहीत्यादिना झच् झोन्तः पाकशासनस्यापत्यम् अत इञ् इन्द्रपुत्रस्त्रीयेः इरावत्यांका तिरमा सिन्धाम्यप इराव-
न्तोऽभवः तत्र भव इत्यण् अभ्रमेघ स्तदाकार मातङ्गः शाकपार्थिवादिः अभ्रेऽब्याकाशे मेघे वा विद्यमानो मातङ्ग इति वा इरयोदके न वसति वणशब्दे पचाद्यच् इरावणः ततः प्रज्ञाद्यण् इरा सुरा वन सुरसंकं यस्मि-
न् पूर्वपदादिति णत्वे इरावतोऽभवः तत्र भव इत्यण् स्वामी तु इरावतोऽभवः तत्र भव इत्यण् विभाषौषधीति वा णत्वमिति तन्न ऐरावणस्यापि प्रयोगः अभ्रे ऐमातिन्यो भ्यातीति वा मन्थरगामिनीत्वात् वाङ्कलकाक्षुः अ-
भ्रमोर्वल्लभः। चत्वारीन्द्रहस्तिनः ४६ ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः ४७ ह्रादमव्यक्तं शब्दे आवश्यके णिनिः ह्रादोऽस्त्यस्या इति
वा इनिः वजति वजगतौ ऋज्रेन्द्रेति रन् अस्त्री स्यादिति पुंस्त्रियोराभ्यामन्वेति सन्निधानाविशेषात् अस्त्रियो वज्रकुलिशावितिसंसारावर्तोक्तेः वज्रोऽस्त्रीत्यमरोक्तस्यैवानुवादः कुलिर्हस्तो भुजादलरति विकालश्ले-
षः कुले शेते अन्येभ्योऽपीतिडः कुलिनः पर्वतान् श्यति वा शो तनूकरणे आतोऽनुपसर्गे इति कः कुलिशं समीप ह्रालिशाति लिशाअल्पीभावे इगुपधेति कः कुलिशो न स्त्रियां प्रोक्तो दम्भोलौ नाकवाञ्छिते भिनत्ति विदिभि-
दिच्छिदेः कुरच् यत्तु कर्मकर्तरि चायमिष्यते इत्यत्र चकारः कर्तरीत्यनुकर्षणार्थस्तेना कर्मकर्तर्येव भवतीति वामनः इति मुकुटे नोक्तं तन्न भाष्यो स्वार्थस्यादर्शनात् निःफलत्वाच्च भिदुरमिति पाठे त्वच्छिमदीत्यादिना
किरच् अच्छिदुः पुनाति, शतं कोटयो धारा अस्य स्वरति स्वृ शब्दोपतापयोः शृस्वृस्निहीति उः शोभना अरुः धारा अस्येति सा तोऽपि शाम्यत्यरीन् अन्तर्भावितण्यर्थोऽच् शमेर्वन् शम्बुममसास्त्यस्य मेघनादिर्द्वितीया दंभोः पानि-
तिवः एतद्द्वये पिदन्तोऽस्यः शं दम्भबन्धने चुरादिः दम्भयति सं वध्नाति शत्रूनिति विग्रहे तप एव गन्तारो यः सेवयते वि ग्रहेः स्यादिरपि नालक्ष्या अपि दम्भोऽसे वसुरकरणो सवह्नि विवेकः दम्भो रोधने अवन् दम्भ सि-
रोधने आलिः समर्थः अलं स्वगण पर्याप्तिवारणेषु इन् दम्भोलिरिति वा अश्नाति अश्नुते व्याप्नोति नेतीति वा अर्त्तिसृधृधम्यम्यश्यवितृभ्योऽनिः इति वज्राशनिरिति समुदितमपि
बोध्यम् वज्राशनि विडुक्ते वज्रमिति त्रिकाण्डशेषात् अथ वज्राशनिर्द्वयोरिति नाम निधानाच्च। दशवज्रस्य ४७ व्योमयानं विमानोऽस्त्री नारदाद्याः सुरर्षयः स्यात्सुधर्मा देवसभा पीयूषममृतं सुधा ४८ व्योम्नि

अ॰ टी॰ ६ यां त्वेन न । करोतेल्युट् । व्योमयाति क्त्वास्युरित्यनिकर्त्तरि ल्युडिति वा । विशिष्टं मानं यस्य तेन । उक्तिसंज्ञायामिति करोतेर्घः । पचतीति मुकुटः जनत्र । पातात्सुरान् प्रसंगतः । वा नुकरणात्करणयोर्विधिर्न । विशेषणत्वात् स्त्रियामिति वा । अथि
करोते ल्युट् । विगतमानं यस्य मासे निवा । विमानो व्योमयानं च स्यात् भूम्नाहेपि च । दोटके पानुमात्रेव पुंस्त्व पुंसकयोर्ध्वमः ॥ देवदेवस्यास्या । नारदस्य स्यं । नरेभ्योति वृक्ष व्यमि मत्सरं नारं ददाति । आतोनुपेति कः । यद्वा नारं पानीयमि
6 त्युक्तं तन्मित्यः सदा भवान् । ददातीति तनेनाम नारदेति अस्त्विन्ध्यन्नीयागमे । नारं नरसमूहं घनिकलहे नेति वा तु विद्धं नारमता नेतव्यमित्यानोपदेशे नेति वा । दोश्रवसे डने कः । आद्येन तुं बुरुभ्रमरपर्वं तद्वेलादयः । सुरा
श्चैतेत्रयादि स्वरा इघ्यश्च । षष्ठीसमासे वा । एकं ॥ शोभनो धर्मोऽस्याः । धर्मादनिच् केवलात् । उभाभ्यामिति पदेऽ ॥ अनोवधु बहिरिति ङीप् । सत्यंभास्याः । सभामाजैति निपातनाद ड्ः । देवानां सभा आस्थान
गृहं । द्वे । पीयतेऽत्र पीयूषं इति सौत्रो धातुः । सीये ह्रस्वः । वहुलवचनात् तेगुण । स्यात् पीयूषं चव्यीयूषममृतं वल्ली रे । मृतेपि चेति हारावली । पीयूषं सप्ताहावधिक्षीरेऽपि यामृते । नम्रियते नेन । नास्ति मृङ् प्राणत्यागे क्तिन् ।
अमृतं यत्र शोधे स्यान्मोक्षेपि सलिले घृते । अयाचिते च मोदे च । नाथं चेतं विदेवयोः । सुखे नदी यतेऽपि मारे । आ नञ्योपसर्गेति कर्मणि प्यङ् । यत्तु अमृत्योकारकाधिकाराद्विशेषमिति मुकुटः । तदा कर्तरि हे । छि
तौ यथा वग्रहणस्य कारकाधिकारस्य नियर्थत्वादिति हेतुरिति स्वरूपा सिद्धेः । अमिति विषयोपाथ वरमृता अथेन तु यथै नात पदविसृष्टत्यानि पुष्याणि शरीरविमिति पचाव जन्ताद्वाप इति जदविनु । नियत्वाद्देतरंगत्वा इत्येकादेशे अ
देनत्वाभावे नयावयोगात् । एकादेशस्य पूर्वान्तत्वेन ग्रहणात् न स्यात्लोप प्रसंगात् च । आतश्चोपसर्गे इति कः प्रत्यये वक्ष्यमाणं वृक्षविनः । अमृतस्य । ४८ मेरावकिनी तिय मंगाख्यनदी सुरदीर्घिका मेरुः सुमेरुहेमाद्रिरत्नसानुः
सुरालयः ४९ ॥ मेदमकितं शैलमस्य । अक कुटिलायां गतौ । स्त्रपीति हिशिदः । विमति । विय नोवा गंगा । स्वः स्वर्गस्य नदी । पूर्वपदात्संज्ञायामिति णत्वं । सुराणां दीर्घिकेव । चत्वारि देवगंगायाः ॥ मिनोति डच् त्वाव्यो
तीत्रिप्रमिच्च मतेपपो । मियीमारुः । मायो रु रिक्तेति मुकुटः तन्न । उज्ज्वलदानादावस्य सुन्नस्यानुपलब्धेः । सुमेरु विति उपसर्गान्तरेनिर्वर्त्यमुक्तं । हेमाद्रिः । रत्नानि सानावस्य । सुराणामालयः ॥ पंचमेरोः ४९
रोचते देवतरवो मंदारः पारिजातकः । संतानः कल्पवृक्षस्य पुंसि वा हरिचंदनम् ॥ ५० मदते । मोदयति । मदि स्तुतिमोदमद स्वप्नकांति गतिषु । अभिमदिमंदिभ्यामारन् । मंदनमाप्यधारा अस्ति सरलत्वादिति वा ॥
पारियातेऽर्णवम् । तः स्वार्थे कः । पन्तुपारि जातो गमने नास्ति । पूर्णमाय पापा रिजातः समुद्रः । तत्र भव इत्यादि पारिजात इति मुकुटः । तन्न । दाक्षण्य पवादस्य सत्त्वादणः प्रसंगात् । वैयर्थ्यात् । जन्यसैव नाम
निर्वचनासि दृश्यं ॥ सम्यक्तनोति पुष्पाणि । गाला लिनीति सत्वेन नौ तेरुपसंख्या नात्तः । सम्यक्तनुवंते पुष्पाणि च्यन्तसिद्धेत नरैः किरणोहरात्रेण सिवज्र्या । कल्पः संकल्पितोऽर्थः । तस्य वृक्षः । जन्यजनकभावसंबंधे
षष्ठी । च दयति । चदि आह्लादने । रणेन । तः । लः हरेः प्रियं चंदनः । हरिचंदनमस्त्री स्यात् त्रिदशानां मतीरुहे । नपुंसकेतु गोशीर्षे ज्योत्स्नायां कुंकुमेपिव । पंचाना देवतरूणामेकैकं । ५० सनत्कुमारो वैधात्रः स्वर्वैद्यौ उ॰
अश्विनीसुतौ नासत्यावश्विनौ दस्त्रावाश्विनेयौ च तावुभौ ५१ सनन्दनि संकुमारः सनात्कुमारोपि यद्वा हंसगो द्विजः सनदितिब्रह्मपर्याये रमसः तस्य कुमारो पत्यम् इत्यादिः विधातुरपत्यं अणू वेद्य संहिताश्लो
त्वात् स्वर्वैद्यपर्यायम् विद्योकच्यनम् ऐवमुक्तमिदम् । स्वः स्वर्गस्य वैद्यौ अश्विन्याः सुतौ न सत्यं ययोस्तावसत्यौ नञ्सत्यौ नभ्रान्नपादिति नञः प्रकृतिभावः प्रशस्ताअश्वाः संति ययोः इनि यद्वा अश्विन्यां जातौ तौ च विष्वे
तेनयत्तो न तत्र भ्यो बहुलमितिल्युति त्वकृद्वित्रकौतिकी योन्युक् अस्ते त्रिजनक तेनययोर्वा इत् दस्यतो ह्रि पतो रोगात् दस्ते उपक्षये स्फायितं चीतिरक् अश्विन्या अपत्ये स्त्रीभ्यो ढक् तावुभा वितिद्वित्वावित्वा
देकवचनाभाव इति स्वामी अयं च प्रायो वादः देवानस्यामजायेतां नासत्यौदस्त्र एव चेति मार्कण्डेयात् नासत्या वितित्वाविति चैकवा चकस्योभयोः प्रयोगो गौतम: षडश्विनः ५१ स्त्रियां बहुष्वप्सरसः स्वर्वेश्या
उर्वशीमुखाः हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम् ५२ अद्भ्यः सरन्ति सरतेरसुन् बहुवित्वाद्या यो वादः अन्न चिच्चेति सत्त्वे अप्सरसः इति भाष्यप्रयोगात् स्त्रियां बहुष्वप्सरसः स्यादेकत्वेऽप्सरा अपि निशाद्याता
वाञ्च अस्य मुंभपाशहवहू एमिति मुकुरोकेचिन्मम अप्सरः स्त्रहृस्यसाजन्त्वात् स्वः स्वर्गस्य वेश्याः ऊरु महतोऽस्यूतेव्याप्नोति वशीकरोतीतियावत् कर्मण्यण् संज्ञा पूर्वकस्य विधेरनित्यत्वान्नवृद्धिः स्वल्पविधुजादित्वात्को
वा उरुभ्यामश्नातीति वा अस्त्वश्वद्वेनाद्यर्थे नरम्भा मेनका ह्रूता चीतिलोत्तमादीनां ग्रहणम् एक मूर्त्तवेश्यादेः । अव्युत्पन्नत्वे अनौ धातोरित्स्याप्राप्तेः शासि हाहाः हूहूः तुमुपी नस्याप्राप्तेर्हूहूर्हूहूरुमादि यद्वा अतो धातोरिति योग
विभागादाकारलोप इति मुकुटेनोक्तं नहि न्याय्यम् निरितीतरूपस्य योगविभागेन निर्वाहः स्योचित्यात् अप्रयुक्तस्य तेनसाधनस्यानुचितत्वात् हा इति शोकव्यंजकशब्दं जहाति जोहाकत्यागे विच् शासित्वाः हू इति ह्वयति के
ञः क्विप् वचिस्वपीति संप्रसारणं हलइति दीर्घः वा हूत्वकादुभयपर्यायेन्तु मृग्यन्तो ग्याल्य पवर्गः सपदे हूहूरपि वेध्याः हाहाः स्मातोपि गन्धर्वोवी निरुक्ते इति सारावलीरगन्धर्वो हाहा सिप्रोक्त इति रत्नकोषाञ्च भो
ज गुहाहूहूः शब्दयोरव्ययत्वमाह हा हास्त्वादिकस्वः कृक्र मुमयवकस्य हू सोहू हाकु हूयतेहोह व पाय्यस्युतं हूहू रितिधा हार्णवात् गीन माधुर्यसंपन्नो विख्यातो च हू हा कु हू इति व्याशोक्तेश्च गन्धः सौरभमर्दं
ति अर्वगतो कर्मण्यण शकन्ध्वादिः प्रज्ञादित्वा दीर्घादिरपि यं अपि गन्धर्वगान्धर्वदिव्यगायनगानवइतिशब्दार्णवात् आद्येन तुंबुरुविश्वावसुचित्ररथादीनां ग्रहः देवगायकानामेकैकम् ५३ अग्निर्वैश्वानरो
वह्निर्वीतिहोत्रो धनंजयः कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ५३ अंगति अग्निगतौ अंगेर्नलोपश्चेति निर्नलोपश्च विश्वेनराअस्य नरेसंज्ञायामिति विश्वशब्दस्य दीर्घः विश्वानरस्यापत्यं अण् ऋष्यण् दिवा
दित्वादन् वहबन्धयन्नन्नोद्धेति लकू विश्वानराद इति मुकुटः तन्न विश्वेभ्यो नराइभ्यः त्रस्य हितः दर्शनात् वैश्वानरायमीढुषे इत्यादावन्तोदात्तदर्शनात् ऋषिभ्यो गोत्रापत्येऽञो विहितत्वेनानन्तरापत्ये प्रसक्त्यभा ६
वाच्च वहतेवि ह्यादित्वात् जित्ति वहन्त्याद्यपि प्रयुक्तः वहतिस्त्वं वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् इति निः विद्धे वीग तिप्रजनकान्त्यसनखादनेषु कर्मणि क्तिन् रवीतिभक्षं प्रवरोनशादि हूयते सिन् हदानो

दनयोः कृपामेतिवत् वीतिरश्मोऽहोतंदहनमस्येतिवा धनंजयति संज्ञायांभृदृइतिखच् कृपीटस्यजलस्ययोनिः कृपीटमुदरेजलेइतिरत्नकोशात् अग्नेरापइतिश्रुतेः कृपीटंयोनिरस्येतिवा अश्मोऽग्निर्ब्रह्मणः त
इतितिमतः ज्वलति ज्वच्चक्रमेतिसूच विद्लृलाभे अस्तन् जातवेदोधनंयस्मात् जातेजातेविद्यते विद सत्तायाम् जातंवेत्ति वेत्तिवेत्ति वा विन्दते तनाति असुन् तनुंशरीरंनपातयति नभ्राण्नपादिति निपातितः तनूनपातो
तनूपातमस्यस्यनिमित्ते इतिमुंचः ननु स्वस्वरूपं नपातिनरक्षति अग्निविनाशित्वात् इतितनूनपात्शब्देन अग्निश्चामितितुमि तनूनपाद्भो तनूनपाद्वितिवा नन्वाऊनंकषपाति ननूनपं ह्युतादि अग्नेऽनन्
वि॰ इतिह तनूनपादौ तनूनपादइतिवा ५३ बर्हिःशुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः ५४ रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः हिरण्यरेता हुतभुग्दहनो हव्यवाह
नः ५५ हंहृति बृहिहन्ही हंहेर्नलोपश्चेतिइत् ऍलिक्रोधं बर्हिहल्कोहहजानुरित्यमरमालायां पुंस्कालेऽपाठात् अकोवैश्वानरोवर्हिर्वर्हिः शुष्माणनयान् इतिशुष्माणोवात् वर्हिःशुष्मेतिव्यस्तसमस्तनामेतिकश्चित्
हविर्विसिविशुषिभ्यः कितिमनिप्रत्ययेशुष्मोऽदक्तोपि कृष्णोवर्त्मवर्त्मास्य नाम्नः शोचीषिज्वालाकेशाइवास्य निर्मसमासे उत्तरपदस्यस्येतिषत्वम् उषःप्रभातेसन्ध्यायामितिविश्वः उषःसंध्यायांबुध्यतेप्रकाशते
इगुपधत्वात्कः अहरादीनांपत्यादिषुरेफः सचव्यवस्थितविभाषयेहनित्यम् आश्रयमाधारमश्नाति कर्मण्यण् आश्रयाश इतिपाठान्तरम् आशेरतेऽत्रेत्याशयः एरच् तमश्नाति बृहन्तोभानवोऽस्येति कृश
तनूकरोति कृशयति क्रूनतंजीयाचक कृशानुः पुनातिपवने ण्वुल् अनितिमनेन इणादिलात्कलच् अनलोवस्त्रभेदेऽग्नौ ५४। लोहिताअश्वायस्य वरुणस्त्वसितानश्वाञ्छ्वेतरः कृशुरोपमान् हुताशनःकिंशु
काभान्वायुर्बभ्रूंस्तथाहलौकिकीतिशालिहोत्रात् रोहितोऽश्वोमरगोश्वोवारुणमस्येतिवा वायोःसखा राजाहःसखिभ्यष्टच् वायुःसखोस्येतिवा अस्मिन्पक्षे टजभावादनन्वाविनतः शिखाःसन्त्यस्य मतुप्
आशोशुषिदेवति आङ्पूर्वाच्छुषतेःसन्वात् आदिः शुषःसनश्छन्दसीत्यनिः कारस्येनामपरिभाषायांप्रयोगः आशुपुंकृत्यरितिताप कान् आशुशीक्षणः कृतोमित्रहिंसाकूतितोनि तालहिंसायाम् रन्तुमुर
तिरजार्थमसत्यं हिरण्यरेतोस्य सान्तः हिरण्यरेताःअसिरसाहिदाकारहविर्भुजोः हुतंभुङ्क्ते क्विप् जान्तः दहति ल्युः हव्यंवाहयति ण्यन्ताद्वहेर्ण्वुः यत्नुरसामीहृत्योवाहयतीतिविग्रहस्य हव्यवाडीवाडवाशङ्कितः हृदुमा
हतेऽत्रुदाहतपावसानुपलम्भात् कव्यवाडीवाडीवाडितिसूपलम्भात् वहश्चेत्युपपदेऽवेर्णिनादसंभवाच्च शुक्रोपिवाहयतीतिविग्रहस्य हव्योऽन्तः पादमितिवदेश्चुडिमान् तदपिन त्युगृह्णादसत्वात् वहश्चेत्यनुवृत्तेः
तासंभवाच्च ५५ सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः शुचिरप्पित्तमौर्वस्तु वाडवो वडवानलः ५६ सप्तार्चिषोयस्य कालीकरालीमनोजवा सुलोहिता सुधूम्रवर्णा स्फुलिङ्गिनी विश्वरुचीतिवासप्तवृत्तेजिह्वाः
दमुउपशमे अन्तर्भावितण्यर्थाद्दमेरुनस् दाम्यतिदमुनाः दमुनसौ दीर्घमध्योपि दमूनाः दमुनाःप्राचीनवर्हिः शुचिवर्हिणाविति नामनिघाणात् शोभयति शुक्रे रन्द्र इति निपातितः सुकरेतोस्यास्तीतिवा अशोशुषयत्
शुक्लवर्णत्वादित्यवारलयोरेकत्व चित्राभानवोऽस्य त्वभादिः विभाप्रभावसुधनंयस्य शुचिःपवित्रकरोतिशुचयतिनकरोतीतित्यन्ताद्चरः यद्वाशोचति अन्तर्भावितण्यर्थात्शुचेरिमुपधाहितीन् अपांपित्तमिव दाह
कत्वात् चतस्त्रिंशदङ्केः। उर्वमुनेरपत्यं विशदाहात् वङ्क्तेयजनोश्लेतितुकिउर्वाः इतिशुक्रः तत्र अनन्तरापत्येऽणोसंभवात् तस्माद्दृष्टव्यम् वडवायांभवः तत्रभवइत्यण् वडवायामनलः आधाराधेयभावपश्चाद्
वन्यत्वेनषष्ठ्यर्थः वीतिवडवाग्नेः ५६ वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिःशिखास्त्रियाम् त्रिषुस्फुलिङ्गोग्निकणः सन्तापःसज्वरःसमौ ५७ वह्नेरितिप्राग्वाचाद्यः हेतिःस्याद्वाप्यधज्वालासूर्यतेजस्सयोरिति
दर्शनात् ज्वलति ज्वलितिकसनेभ्योणः स्त्रियामापि कीलबन्धे कीलति इगुपधेतिकः स्त्रियामाप् अर्च्यते अर्चेःसजायाम् अर्चिःश्रुचिहुसृपिछादिछर्दिभ्यइसिः अर्चिःसान्तः इनि उदन्तोपि अग्नेर्धाजं तत्रार्चयइतिश्रुतेः स्त्रिया
मित्यर्चिरादिभिःसंबध्यते तत्रार्चिर्ज्वालाभासोर्नपुंस्यर्चिरितिक्लीबत्वमपिवक्ष्यति हिनोति हन्तिवा हिगतौ ऊतिसूतीत्यादिनाक्तिन्नन्तोनिपातितः शेते शीङ् किङ्स्वप्नेतिरवः शिखाज्वालावर्हिर्चूडालाङ्गलवत्प्रमात्रके
पचज्वालायां। स्फुरत्यनुकरणशब्दः स्फुनामफल्कारेणलिङ्गति लिगिगतौ पचाद्यच् स्फुलिङ्गजातावपि अजादित्वाट्टाप् अग्नेःकणः द्वे सन्तापयति तपसन्तापे ज्वररोगे ण्यन्तो संज्वरयति पचाद्यच् यद्वासंतापनंसंतापः
तुन् संज्वरयतीतिसंज्वरः मुदितिशुक्रेनोक्तं तत्र वैषम्यप्रमाणाभावात् भावकर्त्रभिधायिनोः समानार्थकत्वाभावात् समौ समानार्थौ समलिङ्गौ द्वे ५७ धर्मराजः पितृपतिः समवर्ती परेतराट् कृतान्तो यमुनाभ्राता
शमनो यमराड्यमः ५८ कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः धर्मस्यराजा राजेतिरच् पितृणांपतिः समंवर्तितुंशीलमस्य सुप्यजातौणिनिः परेताः प्रेताः तेषुराजते सत्सूद्विषेतिक्विप् जान्तः कृतोन्तोविना
शोयेन यमुनायाभ्राताशमयतिल्युः यमेनसंयमेन राजते क्विप् जान्तः यमयति अच् यमोदण्डधरेध्वांक्षे संयमेयमजेपिचेतिविश्वः ५८ कलयत्यायुः कलसंख्याने पचाद्यजन्तात् प्रज्ञाद्यण् इतिमुकुटः तत्र कलेर्मित्वाभावा
त् प्रज्ञाद्यतिरूपद्वयसंग्रहः एतेनृणाम्पितरस्तः तस्मात्कालयतीति विग्रहश्चिन्त्यः कालवर्णत्वाद्वा दण्डस्यधरः श्राद्धस्यदेवः श्रेशाभानाकात् विवस्वतोऽपत्यम् तस्यापत्यमित्यण् अन्तंकरोति मन्तयतिन
त्करोतीतिण्यन्तान्ण्वुल् यमस्यचतुर्दश राक्षसः कौणपः क्रव्यात्क्रव्यादोऽस्रप आशरः ५९ रात्रिंचरो रात्रिचरः कर्बुरो निकषात्मजः यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी ६० रक्षस्यस्मात् रक्षपालने असुन् प्रज्ञाद्यणि रा
क्षसः स्वार्थिकाःप्रकृतितो लिङ्गवचनान्यतिवर्तन्तेपीतिपुंस्त्वम् कुणपंशिवंभक्षयितुंशीलमस्य शीलमित्यण् कौणपाति आनरतिकः कौणपस्यनिर्ऋतेरयं कौणपः तस्येदमित्यण् क्रव्यामाममांसमत्ति क्रव्येचेतिविट् अदोऽनन्नेइ

अम० टी०

7

सेवक्षिदे । एवं च पनार्थमिदम् तेनाममांसभक्षके क्रव्याद् इति भवत्येव कृतं किंतु तदेव तु न विशेषतः कृतं नपक्वं च श्रृंगेति क्रव्यादः कृतविकृतपक्वशवस्य पृषोदरादित्वात् क्रव्यादेश इति काशिका शव्यादिति पिकव्याये सदाक्नादकएग
देवस्य क्रव्याद् आममांसभुक् क्रव्यादः कृतविकृतपक्वमांसभुग् इत्यमरः तस्माद्योगार्थस्य व्यवस्थितत्वेऽपि गौण्याभयोः सामान्येन प्रयोगः अस्त्रं रक्तं पिबतीति आतोऽनुपसर्गे कः नत्वृदक् पिबतेः सुरासीध्वोरिति वचनात् द्रक्स
वाद् नष्पवयतीति क्रव्यादस्रपः पचाद्यच् नाल आशवान् आश्नाति अहिंसायां पचाद्यच् आशिर इति पाठेन्यु शेरते इति किरच् आशिरो रक्षः पशुः क्रव्यादोऽस्रप आशर इत्यमरमालायां वने: ४९ रात्रौ चरतीति चरेष्टः रा
त्रेः कृति विभाषेति पक्षे मुम् कर्बुरो वर्णेन यद्वा कर्वति कर्वं हिंसायाम् मद्गुरादयश्चेति उरच् कर्वर इति पाठान्तरम् नैर्ऋतः कर्वरः क्रव्यात्कर्बुरो यातुरक्षसी इति धरणिः कृहिंसायां कृणोति कृ मूढेच निकषः सुरश्च निक
षाया आत्मजः पृषोदरादिः यातुर्निरुक्तात् सिद्धा नियुक्तानि स्वजातिपोषकत्वात् धाञो बहुलमन्यत्रापीति युच् कन्यात्सुर इत्युक्ता यातुनि धानं नाधीयन्ते स्मिन्निति वा त्वह अन्यस्यादिः जानकदा विद्वानस निधा
नमस्येति च वर्गादिरपि विरूढं ल ल याच लेख्या सौजन्यस्य निर्ऋतेरयं यातिं कमिपति जविगाभाया हिंस्र इति नः ४९ री दि रक्तः यस्मात् असुर भीमाद्योपादाने पंचदशा दलस्य ६ प्रचेता वरुणः पाशी याद
सां पतिरप्पतिः श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ६१ पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः समीरमारुतमरुज्जगत्प्राणसमीरणाः ६२ नभस्वद्वातपवनपवमानप्रभञ्जनाः प्रचेतयति प्रकृष्टं चेतो वास्येति चिन्नी संज्ञा
ने अशुन् प्रचेताः पाशिनि पुलो पसिक्तं चवा च्यवन् म्रियते रलोनिवा हृच्चरतो कृहदारिम्पद्रतन् वरुणस्तरुसृत्वेदेप्स्वनी वीपतिस्तूर्ययोः सूचिवरलोपि वरंहला न्नि नेदेवा वरस्य वरार्थिनां यातु वैवर तो प्रो कल्पसास्त्वर
ण: स्मृत इति साव प्रवालं पाशोस्यास्तीति निः पाशी पाशाधरेण्यता विनिविष्टः यादसां पतिः तत्पुरुषे कर्मीत्यन्ते कु लं किन्तु यादः पतिरपि अपांपतिः त्वकिस्ययतिरपि पंचवरुणस्य । श्वसित्यनेन श्वसनः अने ल्युट् स्पृश
ति स्पृशस्पर्शने बहुलमन्यत्रापीति युच् स्पर्शनो मारुते स्पर्शदानयोः स्पर्शनं मतमिति विश्वः वाति वा गतिगन्धनयोः कृवापाजी स्वदुण् मातरीति सप्तम्या तत्पुरुषे मातरिश्वन् तरिते श्वयतीति वा रति उणोस्मिन्निति हो:
यद्वा मातरि जनन्यां श्वयति वर्द्धते सप्तम्यन्तकरणत्वात् श्वन्नुक्षन्निति निपातनात् मातरिश्वा अलुक् सदागतिरस्य ६१ पृषन्मृगभेदो श्वो वाहनमस्य पृषतामश्वः कृतानामश्वरवेति वा यत्तु पृषन्नश्वः कृतानामश्वोस्येति मुकुटः त
त्र वा वाहनाद्रूकभावस्य विपरीतत्वात् वहति पचाद्यच् गन्धस्य वहः यत्तु गन्धस्य वहः इति विगृह्य अकारादत्र पपदात् सोपपदो भवति विप्रतिषेधेनेत्यसप्रायिकत्वात् बाधाजितिमुकुटः तत्र प्रायिकत्वकल्पनायाति सर्वलता
त् उपपदादिविवक्षायामवः सिद्धत्वाच्च गन्धं वहति कर्मण्यण् अनेनत्वनेन सलिकुल्मनीति तच्च आशु गच्छति अन्यत्रापीति डः समन्तादीरयति गच्छति ईरयति प्रेरयति वा ईरगतौ अच् घञि वा समीरणः म्रियते ऽनेन
उहेन विना वा मरुत् मृग्रोरुतिः ततः प्रज्ञाद्यण् मरुतः शौपि वोध्यः मरुतः स्पर्शनः प्राणः समीरमरुतो मरुदिति त्रिकमादिमकोषात् मारुतः श्वसनः प्राणः समीरो मरुतो जगतुश्चेति स सतावर्णाच्च अन्यपर्वजगन्म
लोपश्च गति जगत्स्यात् इहपेक्षीवंवायो नाजंगमे त्रिषितिरुद्र कोशः जगदाख्योस्य त्वचा तेविष्टपेजंगमेपिच जगती भ्रवनेत्व्यानाच्छदोभेदे जनेपिचेति विश्वः त्रतु अनुतिगमिजुहोती नांद्वेचेति किपि द्वित्वे गमः क्वाविति मनोप
त्वकि जगत् जगतो यदा तद्वर्त्तमाने एव मरुज्जगच्छ स्वरे इति ऋत्वाद्यतेनतदोगिदचामितिनुम् जगत् जगतो यत्तु मुकुटः पृषोदरादिमानेषु हुस्व मरुज्जगच्छ स्वरे इति तत्रास्त्री त्वेवोचृत् तत्र उणादित्यश्यात्मक्रे माना भावात्
भिक्कार्यार्थत्वाद्व पकत्वे तु जगतां प्राणः नभोस्यास्यत्वे नास्ति मतुप तसौ मत्वर्थे इति भत्वाद्रुत्वाभावः वाति हसिमृग्रिण्णिति तन् किच् क्रोन्च संज्ञायामिति क्तिं चिरपि वायुर्मरुत्वान् श्वसनः पवनो मरुतो निलः नभस्वा
द्विपवर्जीति: शुचिनो नवदोव इति साद्रसाकः पुनाति बहुलमन्यत्रापीति युच् पवते मङ् यजो: प्रानच् प्रानेसूक्त पुष्कं भनक्ति मंजो आमर्दने युच् विंशतिर्वातस्य । प्राणोऽपानः समानश्चोदानव्यानौ च वायवः शरीरस्था इमे
रंहस्तरसी तु रयः स्यदः जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ६४ सत्वरं चपलं तूर्णमविलम्बितमाशु च प्रसरतेनापसरतेन समन्ताद्रूर्ध्वं नयाम्याच्यतिमनेन इत्यस्येति वृजितिमुकुटः अमेतु प्राणयति अपानयति
मेनारानयति आनयतेऽः अव्याइत्यादुः इमे प्राणादयः शरीरस्था वायवः तत्र हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः उदानः कण्ठदेशे स्याद्व्यानः सर्वशरीरगः अनुप्रवेशानन्तं ज्ञाप्तुस्सर्गोत्रविपासनम् आवणादिति
मेघादिव त्वा पारः क्रमादमी प्राणादयो वातिनेरितिनियता प्राणोहन्मारुतेवोलेकाद्यजीवेति लवले पुंलिङ्गः इति नेवात्यलिङ्गः पुंस्त्रिता सप्त ६२ । रंमतेनेन रंमेर्दुकचेमस्तुरडागगमस्य रंहत्यनेनवा रहिणतावन्त
र् तरत्यनेन तृप्लवनतरणयोः असुन् तीलामनेन तीगतिरेषणयोः धरच्च रयः इतिस्वामिमुकुटौ तत्र करणेत्युरो बाधकस्य सत्वात् तस्मात्पुंसी तिद्वः रयत्यनेनवा रयगतौ पुंसीतिद्वः इत्यस्येतिवृजित संज्ञायां सर्वक
त्वाहृस्वभावः स्यन्दतेनेन स्यदो जवइति वचनेनेतिनिपातितः जुइतिसौत्रो धातुः जवने अः दोरप् त्वरणं द्विरिति घञुकुटः वस्तुतस्तुरंहस्त्वादिष्वपि भावस्तुसाम्येरिवन्धाप्या पंचवेगस्य । रंहः श्रुपादयः सवेगगतिवचनाः शी
घ्रादयस्तु धर्मवचनाः एव अनपवर्जी घ्रपचतीति प्रयोगोनत्वजवे पचतीतिवदति वस्तुतस्तुरंहः प्रभृत यो वेगात्यये गुणपराः शीघ्रादयस्तु कालाल्पत्वपरा इति क्षिंवितिव्याप्नोति क्षिविप्राशाते शीघ्रादयस्तेत्रिगलानि
पातितः त्वरतेस्म त्रिरवृतासंभ्रमे गत्यर्थाकर्मकेतिकर्त्तरिक्तः रुषमत्वरसंघुषास्वनामिति वेट् इडभावे तूर्णं त्वरत्वरेमः इडभावपि निपातनम् लंघिगतौ लङ्घते लघ्वि वंहीबंहे नोपश्चेति कुः नलोपश्च लविशोषण
इति मुकुटः स्य प्रमादः क्षिपति क्षिपप्रेरणे स्फायी तंचीति रक् अर्च्छति इयर्त्तिवा ऋगतौ पचाद्यच् अरमकेः रथाअः स्पशी भ्रशी हुमपोरपी तिशाप्यतः अलमिस्थयस्य वान्तरत्वेत्यादिनारेफप् द्रे तत्र अश्मिन्नद्य यपाति
अवबाकुलकाल्कीवत्तमितिमुकुटस्य प्रमादः बाहुलकस्याप निकगतिवात् अत्र रक्तगतेः सत्वात् पतेनस्वामुक्तिरपि परास्ता द्रवतिस्म द्रुगतौ गत्यर्थेति कर्त्तरि क्तः यत्तु भावे क्तः इति मुकुटैनोक्तं तन्न त्वरितमित्यादाव

राम
७

पितयोात्वप्रसंगात् वैषम्येबीजाभावात् पतेनलंबतेइतिकर्मण्यनिरपिवराक्ता ६४ सन्तत्वरयावर्तते चोपति चुपमन्दायांगतौ चुपेरङ्गोपधायाइतिकत्वप्रत्ययः विलम्बितेस्म लविस्रवसंसने अकर्मकत्वात्कर्तरिक्तः
नञ्समासः भावेक्तइतिमुक्तटत्तुभर्ववत् अन्तुने अप्रत्याप्तौ कृतापाजीमुएए आश्रुत्तत्रीहिशीव्रयोः एकाध्दशायीत्रस्य सततेनारताश्रान्तसन्ततनाविरतानिशम् ६५ नित्यानवरताजस्रमप्यथातिशयोभरः अ
तिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् ६६ तीव्रैकान्तनितान्तानिगाढबाढदृढानिच क्लीबेशीघ्राद्यसत्वेस्यात्रिष्वेषांभेद्यगामियत् ६७ संतन्यतेस्मा ततविस्तारेक्तः अनुदात्तोपदेशेतिनलोपः समोवाहितत
तयोरितिवासमोलोपः पत्तेसततं आङ्ःसर्वोरमितिर्विरामे अविद्यमानमारतंयस्मिन् अमुतपसिखेदेच भावेक्तः अनुनासिकस्येतिदीर्घः अविद्यमानेश्रान्तमत्र नास्तिविरतमस्य निशाव्यापारराहित्यमुपचारात्ना
स्तिनिशास्मिन् ६५ नियमेनभवं त्यब्नेध्रुवे नात्स्यवरतंयत्र नजस्यतिजस्रमोक्षणे नमिकंपीतिरः सततमजस्रंशाश्वत्याव्ययावपिनित्यपर्यायोक्तः शाश्वदभीक्ष्णंनित्यंसदासततमजस्रमितिसातत्येशत्यवयपरकर
णआपिशलेः नवनिरन्तरस्य। सततंक्रियान्तरेरव्यवधानम् अतिशयस्तुपोनःपुन्यमितिभेदः अतिशयस्तुपौनःपुन्यमितिभेदः अतिशेतेपचाद्यच् यद्वा अतिशयनं एरच् भावे अतिशयोनेऽभिभवत्यनेनअति
र्भवात्पुंसि परश्च इतिसुकरः तत्रसुट्प्रसंगात् भरः दृणातेतिस्वयात्याननिरोधाच्च भूभर्त्सने करणे ऋदोरप् इतिस्वामिमुकुटौ तत्रसुटाबाधप्रसंगात् भरति भृभरणे पचाद्यच् यद्वाभरणंपुंसीतिद्योता।
उपसर्गान्तरनिरपेक्षंचनिर्भरइत्युक्तम्। अतिक्रान्तंवेलांमर्यादांअत्यादयःक्रान्ताद्यर्थेद्वितीययेतिसमासः भृशते भ्रशुअधःपतने अन्नभीविततस्त्वर्थादिगुपधेतिकः भ्रशते भृशं अर्थानितरांति विषयोवानम
तिक्रान्तमत्यर्थं मात्रात्तोकं नामतिक्रान्तं गोस्त्रियामितिह्रस्वः उत्साहनेस्म गाढविलोडनेक्तः निःशेषेणभरो ३६६ तीवति तीवस्थौल्ये बाहुलकाद्रक् एकोऽन्तोनिश्चयोत्रति नितान्तमत्नेस्म तमुकोलायाम् अकर्मकत्वात्कर्त
क्तः अनुनासिकस्येतिदीर्घः गाहूविलोडने बाढवत् बाहृप्रयत्ने तुबाढमितिनिपातितं दृहदृहिवृद्धौ दृहः स्थूलबलयोरितिनिपातितम् चतुर्दशात्रिष्वायस्य शीघ्रादिदृढपर्यन्तंक्रियाविशेषणत्वाद्व्यवर्तमानंक्लीबेस्यात् यथा
शीघ्रंगच्छतीतिसततंभुंक्ते एवंमन्येष्वसत्वगामिद्रव्यगामितत्रिषु वाच्यलिंगमित्यर्थः शीघ्रागजरा शीघ्रोमत्सःशीघ्रंवपुरत्यादि अतिशयभरयोरसत्ववचनेपिपुंस्त्वमेवपुंलिंगेननिर्देशात् गाढैकान्तनितान्तानिपुमानतिश
योभरइतिरभसाञ्च अतिशायपचतीतिप्रयोगस्तुक्रियाविशेषणत्वात् कचिद्दृढगामीतिपाठस्तस्यविशेष्यगामीत्यर्थः ६७ कुबेरस्त्र्यम्बकसखोयक्षराड्गुह्यकेश्वरः मनुष्यधर्माधनदोराजराजोधनाधिपः ६८ किन्नरे
शोवैश्रवणःपौलस्त्योनरवाहनः यक्षैकपिङ्गैलविलश्रीदपुण्यजनेश्वराः ६९ कुत्सितंवेरंशरीरमस्य कुत्सितत्वात् कुत्सायांकिमितिशब्दोयशरीरेवेरमुच्यते कुबेरःकुशरीरत्वात्नाम्नातेनैवसोंकितइतिवापुरुणम् यद्वा कु
बतिधनम् कुविक्षादनेकुवेतेलोपश्चेरक त्र्यम्बकस्यसखा राजतेतिरच् यक्षेषुराजते सत्त्वितिक्विप् गुह्यकायेति आतोनुपेतिकः गुह्यकानामीश्वरः मनुष्यस्येवधर्मआचारः धर्मस्तुलनादिर्वास्य धर्मादनिच्केवलात् ध
र्मादनिच्केवलात् धनंददाते ददूःपालने आनतइतिकः राज्ञांयक्षाणांराजा राजेतिरच् यद्वेवंदेवराजासा दितित्रिकाण्डशेषः धनानामधिपः ६८ किन्नराणामीशः विश्रवसोपत्यं शिवादिभ्यविश्रवसोविश्रवणरवणे
देशोनिपातितो अएरत्तपुलस्तेर्गोत्रापत्यं गर्गादिभ्योयञ् बहुत्वेपुलस्तयः अपत्यंगोत्रेवेतिमुकुटस्तत्र अनन्तरापत्येयञोसंभवात् पुलस्त्यस्यापत्यमितिविग्रहेपियञ् बहुत्वेपुलस्त्याः नरोवाहनमस्य त्वआदित्वान्ण
नम् ईलन्दमीग्रस्थोनित्याप्नोति यक्षआप्तौकर्मण्यण् यक्षेयक्षपूजायाम् अकर्त्रीतिनञ् इंसीतिद्योवा यजतिशिवं इज्यतेलोकेन बाहुलकात्सः सात्स्यगौरीनिरीक्षणेवामेनेत्रं दग्धंविनहेरुद्रात् नपात्पिंगतामगात्
अनपदकंपिंगमस्य इडविडापत्यं तस्यापत्यमित्यण् डलयोरेकत्वस्मरणादेलविडोपि इडविलायाअपत्यमितिवाविग्रहः तत्रारुद्धाभ्योनद्यास्यण् इडविडास्तिमात्स्येनास्यज्योत्स्नादित्वाद्ण्ण्तिवा श्रियंददातीयत्रेदद
तिवा पुण्यजनानामीश्वरः सप्तदशाकुवेरस्य ६९ ^तत्रास्मिन् यक्षापतेस्तुध्रुवनिवासेनिवृत्तेनेनतिर्हर्तनमित्यण् एकं। नलःकूवरोपुरं गंधर्वोस्य त्रिकाण्डशेषेतुपुत्रेनोतुनलकूवरादिमुक्त तन्नानासत्याद्येतिवक्ष्येपचारि
कंबोध्यम् नलकूवरमणिग्रीवयोस्तत्सुतयोःपुराणप्रसिद्धत्वात् ननुकूवरमणिग्रीवावितिख्यातोश्रियान्वितादितिभागवतम् केजलेलासोलसनमस्यकैलासःस्फटिकःस्थलदन्तादित्वात्तुक तस्यायंकैलासः य
क्षकैलेः नामस्थः केलस्यू नसासमूहइत्यण् नैवासनेत्र आसउपवेशने स्तन्यतेतिवुञ् अलति भूषयति अस्त्यनेनवा अलनभूषणेरिगुकुरपितिसंतयोरपूर्वस्यापिपिपकादित्वाड्रत्वं अलकाकुवेरपुर्यामास्त्रियाद्व
लीकुमले एकं पुष्पति पुष्पविकसने कुन् पुष्पमिवर्वा इवप्रतिकृतावितिकन् विमानंपुष्पकंऽस्त्रीनगरीत्वलकाप्रभेति तपाद्धात्तुस्त्वमपि ७०। स्यात्किन्नरःकिंपुरुषस्तुरंगवदनोमयुः निधिर्नाशेवधिर्भेदाःपद्म
शंखाद्यानिधेः ७१ इतिस्वर्गवर्गः किंचित्कुत्सितोवानरः किंत्वेपइतिसमासः एवंकिंपुरुषः कुत्साचकस्यचिन्नरमुखोंश्वकायत्वात् कस्यचिदश्वमुखेनाशरीरत्वात् अयंकिंपुरुषोलोकभेदकिन्नरयोःपु
मान् तुरंगस्येववदनमस्य मिनोति डुमिञ्प्रक्षेपणे भृमशीङ्भ्युः मीनातीत्यालत्वं बाहुलकात्र चत्वारिकिन्नरस्य। नितरांधीयते धाञःकिः नितरांदधातिपोषयत्यनेननिधीयतेवाधिधारणेसंपदादिः आगमशा
सनस्यानित्यत्वान्नलुक् शेकेत्यात्मोहवार्गवधिः नन्सरुपइत्यलुक् यद्वा शेतेऽनेनशेवंसुखं इणशीभ्यांवन् शेवंधीयतेऽस्मिन् कर्मण्यधिकरणेचेतिकिः द्वेसामान्यनिधेः पद्मालक्ष्मीरस्मिन्नस्ति अर्शआद्यच् प्रत्यन्तं
बुद्धःस्वेद्धाध्यानेनेन प्रामेःस्वः पद्मोस्त्रियांमहापद्मःशंखोमकरकच्छपौ मुकुन्दकुन्दनीलाश्च खर्वश्चनिधयोनववेतिशाहृालीवः ७१ इतिस्वर्गवर्गः द्योदिवौद्वेस्त्रियामभ्रंव्योमपुष्करमम्बरम् नभोन्तरिक्षंगगनमनन्तं
सुरवर्त्मखम् ७२ नविभतिकिंचित् द्युलविभुजात्यादिभ्याक्ः यद्वा आपोभ्रस्यस्मात् अन्येभ्योपीतिडः यद्वा अभ्रतिस्थैर्यंगच्छति अच् अभ्रमम्रचरगत्यर्थाः यद्वानभ्राजते आज्दीप्तौ अन्येभ्योपीतिडः अभ्रमेघेचगगन
नेभातुभेदेचकांचने व्ययति वोमसंवरणे नामसीमन्नित्यादिनामन्नन्तंनिपातितं यद्वा व्यवति विग्रहीर्घवयतेर्मनिन् ज्वरत्वरेत्यूठो सवर्णदीर्घः सार्वधातुकेतिगुणः पुष्णाति पुषपुष्टौ पुषःकिदितिकरच् किंत्वंचपु
ष्करंगगनपद्मवारिषु पुष्करंवारिदातीतिस्वामी अविशद्दे भावेल्यञ् अंबशब्दे तेनांति अंबरं नहृयतेमेघैः णहबन्धने नहेर्दिविभश्चेत्यसुन् भश्चान्तादेशः नमतीतिवा भसदीप्तौ क्विप् नभते नभहिंसायाम् असुन्

अस्योद्याने चैत्ररथंपुत्रस्तुनडकूबरः कैलासःस्थानमलकापूर्विमानंतुपुष्पकं ७०

अम॰ टी॰
द्वि॰ टी॰
८

8

साणं नभः क्लीबे पुमान् त्वसौ व्योम आवृणोति वर्षास्तु विसर्जनैः पतनम् इह नभो व्योम्नि नभामेघे श्रावणे च पतन्मेहे व्योमेति अनन्तमस्ते च वर्षासु च नभाः स्यात् निविष्टः अन्तरिक्षमित्वमीत्यसच प्रमयेतनभ समदन्तोपि नभसः प्रसीमन्तादि
वृणोति धावापृथिव्योरन्तरीक्षते ईक्षदर्शने कर्मणिल्युट् वेरेतत्वात् संकल्पतत् अन्तरिक्षलोकं तदात्मस्य पृषोदरादित्वादिके अस्मिन्नवदे स्वमध्यः अन्तरीक्षे तेजसः स्मिन्निनिविष्टकरतान्मुक्तस्तुनो चिना लुप्ताहजो बाधप्रसंगात् गकारात्
नेनालिमित्वा गमे गिश्चेति पुंच गम्यात्कादेशः नास्त्यन्तोऽस्य अनन्तं वर्त्म खयते खवग्रहदारले ः खेलः सविदिवं मनीन्द्रिये अन्येविन्ते खलेवलस्तुकतेर्थे इति हेमः खर्वर्त्मस्मिन्वा खर्वगतो ७२ वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी
सी । इति व्योमवर्गः २ विष्णुपदमित्याशेति हलः शाद् वियच्छति न विरमतीति वा विष्णोर्यमिरज्योपीतिक्विप् कोचनमादीनामितिमलोपत्वक विष्णोः पदमास्पदं स्वरूपं वा विष्णोः पदं विक्रमो यत्रेति स्वामी तत्र अधिकरणक्त
डीष्टिप्रसंगात् आ समन्तात्काशन्ते सूर्यादयो यत्र काशृदीप्तौ हलश्चेति घञ् विशेषेण हायति गमयति विमानादीन् रूयगतौ एपंतादस्तम् विजहाति भुवं वा वहिःशब्दाध्यास हरतीयस्तन् ओदित्वात्सा तु हूर्भेदुक विहर्वा जहातेर्वी
हुलकाद सुविति मुकुरः तत्र अस्त्रेनो धातु मात्राहिक्स्ति त्वेनबाहुलकस्पात् पयोणात् यकारस्याश्रवणप्रसंगाच्च वान्तपुंसी लिंगशाहाइति वचितेनाकाशः विहायाश्च विहर्वि हायसंव्योमपतिलाश्च विहायसमितिशाश्वतः ।
विहायाः शकुनौ पुंसि गगने पुन्नपुंसकं । इति व्योमवर्गः २ दिशास्तु ककुभः काष्ठा आशाश्च हरितश्च ताः प्राच्यवाची प्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः १ उत्तरा दिगुदीचीस्यात् दिश्यं तु त्रिषु दिग्भवे दिशन्त्यवकाशं दिश
न्तिसर्जने क्विप् अस्त्विग्दधृगित्यादिना निपातनात् यन्नमुकुरः कर्मण्येव क्विप् कर्त्रीन्क्विवेत्याह तत्रिर्मलकमाकरविरहेव भागुरिमतेनयापिदिशा दिक् तु स्त्रियां दिशा संती ककुभेतावधः पविरिलि शहा लोवः ककुभे
ककुले ल्वे बाहुलकात् भप्रत्ययः यद्वा कंवातस्कुभ्नाति विस्तारयति स्कुभ्न इति सौत्रादानोः क्विप् पृषोदरादित्वात् सलोपः ककुप् स्त्रियां प्रवेणीदिक् शोभा स्तुंच पकसृजि केनादित्येन जले नरा कुस्मिन्निभाति न तत्राप्येरैव
वन्तोपिक स्विन् तत्र अधिकरणेच हृद्वीष्टिप्रसंगात् काशन्ते हसिकृषीति क्थन् आसमन्तात् अश्नुते व्याप्नोति अश्नुव्याप्तौ ग्रह हरन्ति नयन्ति नयः हृस्तत् इकृत् दिवृषिभ्य इतिः हरिदिदीशा स्त्रियां पुंसि हय वर्णविशेषयोः आदिष्ठा
स्यात् लोचय ताः इत्ययेन स्त्रीत्वमनक्ति दिश्यं बहुत्वात् बहुवचनम् पंच दिशः । प्राच्यप्रशाप्तोत्र प्राचगिमा मोनिस्य सूर्यं अंचुगतिपूजनयोः ऋत्विगादिना क्विन् प्राचतिर विरस्यां वाकुलकादधिकरणेक्विन् मुकुरः तत्र बाहुल
कस्यागतिकगतित्वात् एवमग्रे पि बोध्यम् मुक्ताममध्यंतु सामवाची अपेमयायं मध्यार्थे अपपूर्वी शक्तिरिति अपांचति सर्पं निमुचि निकर्त्तरि क्विधानात् अवाचीमपपाठएव अवषव्य्यस्यां च तेरधोयुलोभाचेत्यन्तेः स्वामी नव
शाद्वस्यामध्यार्थता माह प्रतिपश्चाहिनोते अंचतिसूर्यं अस्यामिति निदेह पुरः पूर्वदक्षिणेन अपसर्वनाम्नो वृत्तिमात्रे पुंवद्भावः १ उदर्धतरमव्र दत्ववनस्तरणयोः उत्तरा उत्तरमंचत्यर्के उत्कर्षाद्वा इह पयमं चति सूर्यो वा अस्यामिति
नपुंसकम् उदईदिशंच नेरनरकारः दिशिभवं दिगादिभ्यो यत् इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् २ कुबेर ईशः पतयः पूर्वादीनां दिशांक्रमात् ऐरावतः पुण्डरीको वामनः कुमुदोञ्जनः ३ पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दि
ग्गजाः करिण्योऽभ्रमु कपिला पिंगलानुपमाः क्रमात् ४ ताम्रकर्णी शुभ्रदन्ती चांगना चाञ्जनावती क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक्स्त्रियाम् ५ एवं च प्राच्यादीनामैन्द्री त्यादिनामानि इन्द्रादीनां च प्राचीपतिरित्यादीनि नाम
नीतिभावः २ पुण्डरीक वर्णयोगात् अर्शआद्यच् खर्वत्वाद्वामनः कुमुदेरको मलं तत्तुल्यवर्णत्वात् कुमुदं केरवं कपद्मे स्त्रीक्ष्मि कौषधौ गन्धार्थांशुलिदिग्नागेनागमालामुपगान्तरे कौमोदनेवा २ उपधानिकः पुष्पदन्तैः स्त्रवि
भजेति कइति मुकुरः तत्र अनुपयोगात् अंजनवर्णत्वात् २ पृथ्वीमिकस्त्वाग्यस्य सर्वभूमा भमो विदितः तत्र विदितः स्मर अवलग्नि काद्विः शोभनाः प्रतीका अवयवा यस्य सुप्रतीको दिग्गजो भेशोभनावयवेविड दिक्षु विख्यातानाग
गाः दिग्गीगागजा इति साधा कणार्थिवाद्धिः इन्द्राद्दिगजानामेकैकः अभ्रस्याकाशपवमानि मामाने निकृष्टादित्वात् तुः नभ्रामपतिवा मूर्जरीमुः मम्प्यरगामिनीत्यर्थः इतिकपिला पिंगलवर्णत्वात् कपिला पिंगले अप्रत्ययान्नास्तु पमास्याः
४ ताम्रौ कर्णौ यस्याः पाककर्णेति ङीष् नासिकेतिवा शुभ्रौ दन्तावस्याः नासिकोदरेति ङीष् शुभ्रौ दन्तावस्याः शुभ्रदन्तीति वा पाठः अंगति गच्छति गतौ पुंच कल्याणोंगमस्या इति वा अंगात्कल्याणे इति नः अंजनवर्णोस्त्यस्यां जन
मत्यस्याः मतौ च बहुचदिति दीर्घः क्रमेणैरावतादीनां हस्तिनामेकैका स्त्रीवाच्ययमिति कर्मधारयो अव्ययीभावस्तु नार्थः अव्ययीभावश्चेति सूत्राम्भ्लीबत्वाच्च यलयोर्विधानात् तेन नाव्ययीभावात्तोम्त्वपंचम्याः इत्यादिप्रवृत्तिः अवे
तिमध्यवाची शरदादित्वात् टच् आवन्नेनस मासेनुटज्यापेतिन दिशोरिदमपदिशं विभक्त्यर्थे अव्ययीभावइति स्वामी तन्नु सं च स्थमात्रस्य विभक्त्यर्थेत्वेपिमध्यस्य तदर्थत्वाभावात् दिग्भ्यो विनिर्गता विदिक्कोणा सेव प्रदिक् यान्या
सामन्तराला निप्रदिशो विदिशश्च नाऽस्त्यमरमाला ५ अभ्यन्तरं त्वन्तरालं चक्रवालं तु मण्डलम् अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः धाराधरो जलधरस्तडित्वान्वारिदोऽम्बुभृत् घनजीमूतमुदिरजलमुग्धूमयोनयः ७ अ
भिगतमन्तरं अन्तरं ल्याति अन्तोत्तुपेतिकः अन्येषामपीति दीर्घः अरः प्रक्षेपो वा न्तलविभुआदित्वात्कः हेमध्यमागस्य । चक्राकारेण वलते वलसंवरणे अच् अन्येषामपीति दीर्घः यद्वा भवे वनि वालः चक्रमिव वालोस्य यद्वा चक्राका
रेण वाडते वाडृ आप्लाव्ये अच् चक्रवाडे डलयोरैक्यस्मरणाद्वा क्रवालं मण्डयति मडिभूषायां वृषादित्वात्कलच् मंडमश्चालाती तिवा हेमण्डलाकोरेण परिणतसमूहस्य अपो विभर्ति सलविभ्रजारित्वात्कः अभ्रति अभ्रगतौ अच् अभ्र
धः पतने मन चिनीतिडि वेन्भ्यप्रत्ययो प्रत्यान् अपेभ्योपीति उइतिवा अभ्रं मेघे तेच गगने धान्यभेदेच कांचने मेहति मिहसेचने अच् मेघकादित्वात्कुत्वं मेघो मुस्तामनस्योः मुमान् वारिवहति कर्मण्यण् स्तनयति स्तनगर्जदेवशब्दे
चुरादावदन्तः स्तनिहृषिपीतीत्नुच् मृषामने णिलोपः वारिवाहकः पृषोदरादिः वलाकामिहायते गम्यते अरहृगतौ कर्मणि क्विप् पृषोदरादिः वलेन नहीयते अन्तरीयते वा क्विप् ६ धारा ताञ्जलस्य च धरः धाराधरोसि मेघ
योः तडितः संत्यस्मिन् मतुप् झयः इति वत्वं वारिददाति आतो नुपेतिकः अम्बु विभर्ति क्विप् हन्यते वायुना नर्जो घनइत्यमकतेच घनसान्द्रं स्यनातादिवा अमध्यामतत्वयोः नामूता होवनाद्रोषु विस्तारेलो हस्तभरे जीव नं जलं
मूतं बद्धमनेन वद्धः मूतं कर्मणि मञ्ज पृषोदरादिः ज्यानं जीः ज्यावयोहानौ संपदादि क्विप् जियावयो हान्या सूतो बद्ध इति वा मोदन्ते नेन मुद्हर्षे इषिमदिमुदीति किरच् मुदिरः कामुके मेघे जलं मुंचति मुञ्चमोक्षणे क्विप्
धूमोयोनिरस्य यद्यपि शद्धार्णवे मेवास्तत्रिविधास्त्वव वह्निजाः धूमयोनयः विश्वासं नात्मजो मेनाते नेयाजी कस्य पिलः यतज्जात्तुतनाबोतः पुष्करावर्त्तकादय इति विशेषपरत्वमुक्तं तथाप्यत्रापि हत्तिर्नेविरुद्धा पं

अम
८